# Mushakaga Stuti Devarshayamushakakrita

# દેવર્ષયમૂષકકૃતા મૂષકગસ્તુતિઃ

## Document Information

Text title : Mushakaga Stuti Devarshayamushakakrita

File name : mUShakagastutiHdevarShayamUShakakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 20 | 5.20. 6-31||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# દેવર્ષયમૂષકકૃતા મૂષકગસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
નમસ્તે સ્તેયરૂપાય સર્વહૃત્સ્થાય ધીમતે ।
અન્તર્ભોગકરાયૈવ મૂષકાય નમો નમઃ ॥ ૬॥
માયયા સ્તેયરૂપિણ્યા મોહયિત્વા ચરાચરમ્ ।
ચૌરવદ્ભોગકર્તા ત્વં ચૌરરૂપાય તે નમઃ ॥ ૭॥
ચરાચરમયાયૈવ ચરાચરધરાય તે ।
સર્વાધીશાય લોકાય કાલકાલાય તે નમઃ ॥ ૮॥
અનાદયે મહેશાય ચતુર્વર્ગપ્રદાયિને ।
ગણેશવાહનાયૈવ ગણેશધ્વજસંસ્થિત ॥ ૯॥
સર્વત્રગ ગણાધીશસ્ત્વયા હૃત્સ્થ ન સંશયઃ ।
ચાલકાત્મકવીર્યં યદ્ગણેશસ્ય ત્વમઞ્જસા ॥ ૧૦॥
બ્રહ્માકારશરીરાય સ્તેયાનાં સ્વસ્વરૂપિણે ।
નમો નમઃ પરેશાય ચતુર્મયસ્વરૂપિણે ॥ ૧૧॥
ચતુર્ણાં ગણપઃ પાતા ત્વયા તદ્રૂપધારિણા ।
ભવ વાહનમુખ્યં વૈ ગણેશસ્યાઽધુના પ્રભો ॥ ૧૨॥
ઇતિ સ્તુતઃ પ્રસન્નાત્મા મૂષકસ્તાનુવાચ હ ।
ભવિષ્યામિ મહાભાગા વાહનં ગણપસ્ય ચ ॥ ૧૩॥
એવમુક્ત્વા ગણેશાનં પ્રભું તુષ્ટાવ લબ્ધધીઃ ।
મૂષકો દર્શનેનૈવ હર્ષયુક્તો મહાદ્યુતિઃ ॥ ૧૪॥
મૂષક ઉવાચ ।
દેવાય યોગરૂપાય નમો મૂષકગાય તે ।
ગણેશાય પરેશાય પરાત્પરતરાય તે ॥ ૧૫॥
અનન્તાય મહેશાય મહેશૈઃ સંસ્તુતાય ચ ।
વિઘ્નેશાય મહાવિઘ્નધારિણે તે નમો નમઃ ॥ ૧૬॥

અનન્તસૂનવે તુભ્યં દૈત્યદાનવમર્દિને ।
દેવાનાં પાલકાયૈવ હેરમ્બાય નમો નમઃ ॥ ૧૭॥
સ્વાનન્દવાસિને તુભ્યં ભક્તસ્વાનન્દદાયિને ।
બ્રહ્મણે બ્રહ્મણાં ચૈવ પતયે તે નમો નમઃ ॥ ૧૮॥
ચતુર્ણાં ચાલકાયૈવ ચતુઃસંયોગમૂર્તયે ।
ચતુર્ણાં પદદાત્રે તે તૈર્હીનાય નમો નમઃ ॥ ૧૯॥
યોગેશયોગરૂપાય યોગિભ્યો યોગદાયિને ।
શાન્તિરૂપાય વૈ તુભ્યં શાન્તિદાય નમો નમઃ ॥ ૨૦॥
મૂષકવાહનાયૈવ મૂષકધ્વજિને નમઃ ।
સિદ્ધિબુદ્ધિપતે નાથ ભક્તેશાય નમો નમઃ ॥ ૨૧॥
વેદવાક્યપ્રમાણેન માં કુરુષ્વ ગજાનન ।
વાહનં ભક્તિસંયુક્તં સેવાયૈ તે નમો નમઃ ॥ ૨૨॥
ઇદં મૂષકગો નામ મદીયં તુ ત્વયા ધૃતમ્ ।
અતોઽભેદમયીં ભક્તિં દેહિ નાથ નમો નમઃ ॥ ૨૩॥
મદીયનાથરૂપેણ નામ તે ચાઽભવત્ પ્રભો ।
તતો મૂષકગો ભક્તં માં કુરુષ્વ મહાદ્ભુતમ્ ॥ ૨૪॥
એવં સ્તુત્વા ગણાધીશં પ્રણનામ સ દણ્ડવત્ ।
ભક્તિસંયુતમુત્થાપ્ય ગણાધીશો જગાદ તમ્ ॥ ૨૫॥
(ફલશ્રુતિઃ)
મૂષકગ ઉવાચ ।
વાહનં મે સદા સાધો ભવિષ્યસિ મહામતે ।
મદીયા ભક્તિરત્યન્તં સુદૃઢા તે ભવિષ્યતિ ॥ ૨૬॥
ત્વયા કૃતમિદં સ્તોત્રં મદીયં ભક્તિદં ભવેત્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં સર્વદં પરમ્ ॥ ૨૭॥
પઠતે શૃણ્વતે ચૈતત્ પુત્રપૌત્રાદિકપ્રદમ્ ।
યદ્યદિચ્છતિ તત્તદ્વૈ સફલં પ્રભવિષ્યતિ ॥ ૨૮॥
અન્યત્ત્વં શૃણુ મે વાક્યં દેવૈર્વિપ્રૈઃ કૃતં મહત્ ।
સ્તવનં સર્વમાન્યં તે ભવિષ્યતિ ન સંશયઃ ॥ ૨૯॥
યસ્ત્વાં સ્તોષ્યતિ ચૌરેશસ્તોત્રેણાનેન માનવઃ ।
સ સર્વં લભતે નિત્યમીપ્સિતં નાઽત્ર સંશયઃ ॥ ૩૦॥
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવિષ્યતિ ।
મદીયકૃપયા સોઽપિ ત્વત્સમો મે પ્રિયો ભવેત્ ॥ ૩૧॥

ઇતિ દેવર્ષયમૂષકકૃતા મૂષકગસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૦ । ૫.૨૦। ૬-૩૧॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 20 . 5.20. 6-31..

Proofread by Yash Khasbage, Preeti Bhandare

*Mushakaga Stuti Devarshayamushakakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*